गी वैद्यकृते वैद्यविनोदे परीक्षादिकथनः षष्ठः परिच्छेदः अथ षड्रसप्रकरणं
काकोल्यादिः क्षीरघृतवसामज्जाशालिषष्टिकयवगोधूममाषश्रृंगाटककसेरुकत्रपुसे
र्वारुककर्कारुकालाबूकालिंदकनकगिलोड्यप्रियालपुष्करबीजकाश्मर्यमधूकद्राक्षाख
र्जूरराजादनतालनारिकेलेक्षुविकारबलातिबलात्मगुप्ताविदारीपयस्यागोक्षुरक्षीरमो
रटा मूलिका कूष्मांडप्रभृतीनि समासेन मधुरो वर्गः इति मधुरवर्गः दाडिमामल

वै०वि० कमातुलुंगाम्रातककपित्थकरमर्दवदरकोलप्राचीनामलकतिंतिडी(क)कोशाम्रभव्यपारा
वतवेत्रफललकुचाम्लवेतसदंतशतद्रपिनकसुरासुक्तसौवीरकतषोदकधान्याम्लप्र
भृतीनिअम्लवर्गः इत्यम्लवर्गः सैंधवसौवर्चलविडपाक्यरोमकसामुद्रकपक्त्रिमयवक्षा
रसुवर्चिकाप्रभृतीनिसमासेनलवणवर्गः इतिलवणवर्गः पिप्पल्यादिः सुरसादिः शिग्रु
मधुशिग्रुमूलकलशुनसुमुखशीतशिवकुष्ठदेवदारुहरेणुकावल्गुजफलचंडागुग्गुलमुस्ता
लांगलकिशुकनासापीलुप्रभृतीनि इतिकटुवर्गः न्यग्रोधा[illegible]ग्वधादिगुडूच्यादिमंडु
कपर्णीवेत्रकरीरहरिद्राद्वयेंद्रयववरुणस्वादुकंटकसप्तपर्णबृहतीद्वयशंखिनीद्रवंतीत्रि
वृत्कृतवेधनककर्कोटककारवेल्लकवार्ताककरवीरसुमनःशंखपुष्पीआपामार्गत्रायमाणाअ
शोरोहिनीवैजयंतीसुवर्चलापुनर्नवावृश्चिकालीज्योतिष्मतीप्रभृतीनि इतितिक्तवर्गः
न्यग्रोधादिरंबष्ठा[illegible]दिः प्रियंग्वादिर्लोध्रादिस्त्रिफलासल्लकीजंब्वाम्रबकुलतिंदुकफ
लानिशाकफलपाषाणभेदकवनस्पतिफलानिशालसारादिश्चकुरबककोविदारकजीवंती

मासद्वयोद्भवः ४

चिह्नीपालं वराः नीवारकादयः मुद्गादयश्च इतिकषायवर्ग इतिवैद्यविनोदे ३२ विवर्णः
सप्तमपरिच्छेदः अथान्नपानगुणप्रकरणं तत्रादौ रक्तशालिगुणमाह तेषां लोहितकः श्रे
ष्ठोदोषघ्नः शुक्रमूत्रलः चक्षुष्यो वर्णकृत्स्वादो हृद्यस्तृट्दाश्रमापहः १ बल्योज्वर
हरश्चैव सर्वदोषविषापहः अथषाष्टिकगुणमाह षष्टिकः प्रवरस्तेषां कषानुसरो लघुः
२ मृदुः स्निग्धस्त्रिदोषघ्नः स्थैर्यकृद्बलवर्द्धनः विपाके मधुरो ग्राही तुल्यो लोहितशा
लिभिः ३ अथकुलत्थगुणः उक्तः कुलत्थोरसतः कषायः कटुर्विपाके कफमारुत
घ्नः शुक्राश्मरी गुल्मनिषूदनश्च संग्राहकः पीनसकासहारी ४ अथयवगुणः
यवः कषायो मधुरो हिमश्च कटु विपाके कफपित्तहारी व्रणेषु पथ्यास्तिलवच्चनित्यं
बद्धमूत्रो बहुवातवर्चाः ५ अथव्रीहिधान्यगुणः दग्धायाउमवनोयात्ताशालयो
लघुपाकिनः कषाया बद्धविण्मूत्रा रूक्षाः श्लेष्मापकर्षणाः ६ अथगोधूमगुणः

वैं०वि० गोधूम उक्तो मधुरो गुरुश्च बल्यः स्थिरः शुक्ररुचिप्रदश्च स्निग्धोतिशीतोऽनिलपि
त्तहारी संधानकृत् श्लेष्मकरः सरश्च ७ अथ मुद्गगुणमाह ना सर्थैवातलास्ते
षां मुद्गा दृष्टिप्रसादनाः अथ मुद्गसूपगुणः मुद्गसूपो लघुर्ग्राही हिक्का दोषत्रया
पहः ८ अथ मसूरगुणः विपाके मधुराः प्रोक्ता मसूरा बद्धवर्चसः ऋते मुद्गमसू
र्याम न्ये चाध्मानकारकाः ९ अथाढकीगुणः आढकी कफपित्तघ्नी नातिवातप्रको
पिनी अथ चणकगुणः वातलाः शीतमधुराः सकषाया विरूक्षणाः कफशोणि
तपित्तघ्नाश्चणकाः पुंस्त्वनाशनाः १० अथ माषगुण माषो गुरुर्भिन्नपुरीषमूत्रः
स्निग्धोष्णरुच्यो मधुरोऽनिलघ्नः संतर्पणस्तन्यकरो विशेषाद्बलप्रदः शुक्रकफा
वहश्च ११ अथ राजमाषगुणः कषायभावो न पुरीषभेदी न मूत्रलो नैव कफस्य
कर्ता स्वादुर्विपाके मधुरोति सांद्रः संतर्पणः स्तन्यरुचिप्रदश्च ॥१२॥ ६८॥

३५

अथजोंधळेगुणः धवलोयावनालस्तू पांडुस्तारतंडुलः नक्षत्रकूरकस्तारोस्तो
मोतीकतंडुलः धवलोयावनालस्तू गौल्योबल्यस्त्रिदोषजित् वृष्योरुच्योप्रद
र्शोघ्नः पथ्योगुल्मव्रणापाह पांढरेजोंधळे अथतिलगुणः ईषत्कषायोमधुरःस
तिक्तःसग्राहकःपित्तकरस्तथोष्णः तिलोविपाकेमधुरोबलिष्ठास्निग्धोव्रणेलेपनए
वपथ्यः १३ दंत्योग्निमेधाजननोल्पमूत्रस्त्वच्योथकेश्योनिलहागुरुश्च तिलेषुसर्वे
ष्वसितःप्रधानोमध्यःसितोहीनतरास्तथान्ये १४ अथसर्षपगुणः पाकेरसेवापिक
टुःप्रदिष्टःसिद्धार्थकःशोणितपित्तहेतुः तीक्ष्णोष्णरूक्षःकफमारुतघ्नः सिद्धार्थकःश्वा
सनिषूदनश्च १५ अथशवीगुणः सिताऽसिताःपीतकरक्तवर्णाभवंतियेनेकविधास्त
शेषाः पथ्योदितास्तेगुणतःप्रधानाज्ञेयाःकटूष्णारसपाकयोश्च निवारारण्यधान्य
स्यान्मुनीधान्यंतृणोद्भवं नीवारोमधुरस्निग्धःपवित्रःपथ्यदोलघुःदेवसाळि ॥
अथान्नप्रकरणेदुग्धप्रकाराभक्ष्यास्तेषांगणः भक्ष्याःक्षीरकृताबल्यावृष्याहृ

वै०वि० धाः सुगंधिनः अदाहिनः पुष्टिकराः दीपनाः ० पित्तनाशनाः १६ तेषां प्राणतराः हृद्याघृतपूपाः कफावहाः वातपित्तहराः वृष्यागुरवो मांसैः रक्तलौः १७ बृंहणा गोठिका भक्ष्या गुरवो अनिलनाशनाः आदाहिनः पित्तसहाः शुक्लाः कफवर्द्धनाः १८ गुरवो बृंहणाश्चैव मोदकास्तु सुदुर्जराः हृद्याः पथ्यतमाः स्तेषां लघवः फेणिकादयः १९ वेशवारैः सपिशितैः संपूर्णा गुरुबृंहणाः पैललौः श्लेष्मजननाः शष्कुल्यः कफपित्तहाः २० वीर्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपनाः विदाहिनो नातिबला गुरवश्च विशेषतः २१ सक्तवो बृंहणा वृष्यास्तृष्णापित्तकफापहाः पीताः सद्यो बलकरा भेदिनः पवनापहाः २२ लाजाश्छर्द्यतिसारघ्ना दीपनाः कफनाशनाः बल्याः कषायमधुरा लघवस्तृण्मलापहाः २३ अथ जलगुणमाह सक्षारं पित्तलं कोपं श्लेष्मघ्नं लघु लेखनं नादेयं वातलं रूक्षं दीपनं लघु लेखनं २४

ऋतुवर्जितं १   गा ठे २   दुर्गंधि ३   तृणकाष्ठवंशसंयुक्तं ४

तोडागे वा तले स्वादु कषाये लघुपाकतः   वातश्लेष्महरं वाप्यं सक्षारं कटुपित्तलं
२५ कफघ्नं दीपनं हृद्यं लघुप्रस्रवनोदकं   मधुरं पित्तशमनं मविदाह्यौद्भिदं जलं
२६ जौड्यमग्निकरं रूक्षं मधुरं कफकृत्तवं   कैदारं मधुरं प्रोक्तं विपाके गुरु दोषलं
२७ सामुद्रमुदकं विस्रं लवणं सर्वदोषकृत्   पाके विदाहि तत् छाद्यं प्रशस्तं प्रीतिवर्द्ध-
नं २८ दीपनं स्वादु शीतं च तोयं साधारणं लघु   कीटमूत्रपुरीषांडशवकोष्ठप्रदूषितं
२९ तृणपर्णोत्करयुतं कलुषं विषसंयुतं   योवगाहेद्वर्षासु पिबेद्वापि नवं जलं
३० बाह्याभ्यंतरजान्रोगान्प्राप्नुयात्क्षिप्रमेव सः   सौवर्णे राजते ताम्रे कांस्ये मणिमये
तथा ३१ पुष्पावतंसं भौमे वा सुगंधि सलिलं पिबेत्   व्यापन्नं वर्जयेन्नित्यं तोयं वाप्यमै-
नार्त्तवं ३२ गंगांबु वात्रिदोषघ्नं गृहीतं यच्च भाजने   बल्यं रसायनं मेध्यं पात्रापेक्षि
ततःपरं ३३ मूर्छापित्तोष्मदाहेषु विषार्त्ते मदात्यये   भ्रमक्लमपरीतेषु तमके वमथौ
तथा ३४

पानीयं पानीयं शारदिवसंतेच पानीयं ॥ नादेयं नादेयं शारदिवसंतेच नादेयं ॥ स्फुटं ॥१॥

वै॰वि॰ ऊर्ध्वगे रक्तपित्ते च शीतमंभः प्रशस्यते पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे आध्मा
ने स्तिमिते कोष्ठे सद्यः शुद्धौ नवज्वरे ३५ हिक्कायां स्नेहपीते च शीतांबु परिवर्जयेत्
कफमेदोनिलामघ्नं दीपनं वस्तिशोधनं ३६ श्वासकासज्वरहरं पथ्यमुष्णोदकं सदा
तत्पादहीनं वातघ्नमर्द्धं पित्तविकारनुत् ३७ कफघ्नं पादशेषं तु तृड्रोगंपजलं विदुः
पक्वाथ्यमानं निर्वेगं निफेनं निर्मलं लघु ३८ चतुर्भागावशेषं तु तत्तोयं सन्निपातजित्
स्निग्धं स्वादु हिमं हृद्यं दीपनं वस्तिशोधनं ३९ वृष्यं पित्तपिपासाघ्नं नारिकेलोदकं गुणं ते
षितो मोहमायाति मोहात्प्राणान्विमुंचति ४० अतः सर्वास्ववस्थासु नक्वचिद्वारि वा
र्यते पानीयं प्राणिनः प्राणा विश्वमेतच्च तन्मयं ४१ अतोत्यंत निषेधेपि नक्वचिद्वा
रि वार्यते घोरोपद्रवसंयुक्ता तृष्णा मारणमादिशेत् ४२ औषधं हेमरजतमृद्भा
जन परिस्थितं पीवेत्सन्नवदनः पीत्वा पात्रमधोमुखं निक्षिप्याचम्य शालिलं ता
बुल्यमुपकल्पयेत् वीर्याधिकं भवति भेषजमन्नहीनं हन्याति दामय ब संसयमा

सुन्वैव इतिपाणियप्रकरणं अथसंस्कृतान्नगुणः लाजमंडोविशुद्धानांपथ्यः
पाचनदीपनः वातानुलोमनोहृद्यःपिप्पलीनागरायुतः ४३ स्वेदाग्निजननीलघ्वीदी
पनीबस्तिशोधनी क्षुत्तृष्णाग्लानिहारिणीपेयावातानुलोमनी ४४ विलेपीतर्पणी
हृद्याग्राहिणीबलवर्द्धनी शाकमांसफलैर्युक्ताविलेप्यम्लानदुर्जरा ४५ अथमंडा
दीनांलक्षणं सिक्थैर्विरहितोमंडः पेयासिक्थसमन्विता बहुसिक्थाविलेपीस्याद्यवा
गूर्विरलद्रवः ४६ अथपायसगुणः विष्टंभिपायसंबल्यंकफमेदोहरंगुरु अ
थकृशरागुणः कफपित्तकरीबल्याकृशरानिलनाशिनी ४७ अथभक्तगुणः धौ
तस्तुविमलःशुद्धोमनोज्ञःसुरभिःसमः स्विन्नःसुप्रस्रुतस्तप्तोविशदश्चौदनो
लघुः ४८ अथभ्रष्टतंदुलगुणः लघुःसुगंधिःकफहाविज्ञेयोभ्रष्टतंदुलः
अथभक्तसंयोगिनांद्रव्याणांगुणः स्नेहैर्मांसैःफलैःकंदैर्वैदलाम्लैश्चसंयुताः
गुरवोबृंहणाबल्यायेचक्षीरेणसाधिताः सुस्विन्नोनिस्तुषोभृष्टोईषत्सूपोलघुर्हितः
५०

कांजी २

वै०वि० स्विन्नं निष्पीडितं शाकं स्नेहसंस्कारतं हितं अस्विन्नस्नेहरहितमापीडितमतोन्यथा ५१
स्नेहगोरसधान्याम्लफलाम्लकटुकैः सह सिद्धं मांसं हितं बल्यं रोचनं बृंहणं गुरु ५२
तदेव गोरसादानं सुरभिद्रव्यसंयुतं विद्यात्पित्तकफोद्रेकं बलमांसाग्निवर्द्धनं ५३ परि
शुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु रोचनं बलमेधाग्निमांसौजःशुक्रवर्द्धनं ५४ तदे
वालुप्तं पिष्टत्वांदुलुं तमिह पाचकं परिशुष्कगुणैर्युक्तं वन्हेः पक्वमतो लघु ५५ तदेव शु
ल्लिकाप्रोक्तं मगारोपरिपाचितं ज्ञेयं गुरुतरं किंचित्सर्वदिग्धं गुरुपाकनः ५६ उल्लुप्तं भर्जि
तं पिष्टं प्रतप्तं कटु पाचितं मांसं यत्तैलसिद्धं तद्वीर्योष्णं पित्तकृद्गुरु ५७ लघ्वग्निदीपनं हृ
द्यं रुच्यं दृष्टिप्रसादनं अनुष्णवीर्यं पित्तघ्नं मनोज्ञं घृतसाधितं ५८ प्रीणनः प्राणजन
नः श्वासकासक्षयापहः वातपित्तश्रमहरो रसो मांससमुद्भवः ५९ स्मृत्योजःस्वरहीनानां
ज्वरक्षीणक्षतोरसां भग्नविश्लिष्टसंधीनां कृशानामल्परेतसां ६० दिवानक्तं रात्रिव
र्ज्यं रात्रिनक्तं दिवावर्ज्यं जले उष्णं कपिशीतं क्वोष्णं क्वपिच्छं पथ्यशीत्यानेचपाथः ८

३८

75

पानी न मद्दिवाज्याज्यमुपैतिस्तं न कंचन तं यदि वा नत दिवा च न कंचन भीस्तदा मज्ज
ले युक्तमतो गृहीतं ६१ आप्यायनः संहननः शुक्रदो बलवर्द्धनः सदाडिमयुतो यूष्यः
संस्कृतो दोषनाशनः ६२ प्रीणनः सर्वभूतानां विशेषान्मुखशोषिणां क्लमतृष्णापहरः
श्रेष्ठः स्वारावः स्वादुशीतलः ६३ पटुकृतरसंमासेन न तु पुष्टिबलावहः विष्टंभि दुर्जरं
रूक्षं चिरसंमानतावहे ६४ दीप्ताग्नीनां सदा पथ्यः खानिष्कस्तु परं गुरुः अथ वेसवारः
पिप्पलीशुंठिमरिचहिंगुसर्पिःसमन्वितं एकत्र कृत्वा साधयेत्सम्यग्वेसवार इति स्मृतं ६५
वेसवारो गुरुः स्निग्धो बल्यो वातरुजापहः कफघ्नो दीपनो हृद्यः शुद्धानां प्राणिनामपि
६६ इयं पथ्यतमश्चापि मुद्गयूषः कृताकृतः मसूरमुद्गगोधूमकुलत्थलवणैः कृतः
६७ कफपित्ताविरोधी स्याद्वातव्याधौ च शस्यते पटोलनिंबयूषौ तु कफमेदोविशोषिणौ ६८
पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ६९
हंति मूलकयूषस्तु कफमेदोगलामयान् कुलत्थयूषोऽनिलहृत् श्वासपीनसनाशनः
७०

वै०वि० नूणीप्रनूणिकारसार्शोगुल्ममेदकफापहः मुद्गामलकयूषस्तुग्राहीपित्तकफेहितः ७१
यवकोलकुलत्थानांयूषः कंठ्यानिलापहः दध्यम्लः कफकृद्बल्यःस्निग्धोवातहरोगुरुः
७२ तक्राम्लःपित्तकृत्शोथविषरक्तप्रदूषणः तिलपिण्याकविकृतिः शुष्कशाकंविरूढकं
७३ पिंडाकिणीगुरूत्निस्फः कासपित्तकराणिच अथसिखरणगुणः रसालाबृंहणीबल्यास्नि
ग्धावृष्याचरोचनी अथसगुडदधिगुणः स्नेहनंगुडसंयुक्तंहृद्यंदध्यनिलापहं ७४ अथ
सक्तुगुणः सक्तवःसर्पिषाभ्यक्ताशीतोदकपरिप्लुताः नातिद्रवानातिसांद्रामंथइत्यभि
धीयते ७५ मंथःसद्योबलकरःपिपासाश्रमनाशनः साम्लःस्नेहगुडोमूत्रकृच्छ्रोदा
वर्तनाशनः ७६ शार्करक्षुरसाद्राक्षायुक्तःपित्तविकारनुत् द्राक्षामधूकसंयुक्तः
कफरोगनिबर्हणः ७७ इतिमंथगुणः इतिसागीवैद्यकृतेउष्टमःपरिच्छेदः अथाम्ला
नुपानं अम्लेनकेचिद्विहितामनुष्यामाधुर्ययोगेप्रबलाभवंति तथाम्लयोगेमधुरे
णतृप्तास्तेषांयथेष्टंप्रवदंतिपथ्यं १ शीतोष्णतोयासवमद्ययूषफलाधान्याम्लपयार

गाढा:६

दोषरहितानां १ मद्येन दुर्बलानां ८

लानां यस्यानुपानं तु हितं भवेद्यत्तस्मै प्रदेयं त्विह मात्रया तत् २ व्याधिं च कालं च विभाव्य
धीरैर्द्रव्याणि भोज्यानि च तानि तानि सर्वानुपानेषु वरं वदंति मेध्यं पयदंभः शुचिभाजनस्थं
३ लोकस्य जन्मप्रभृति हि यस्मात्तोयात्मकाः सर्वरसाश्च दृष्टाः संक्षेपत एष हितोऽनुपानेष्व
तः परं विस्तरतोऽभिधास्ये ४ शीतोदकं माक्षिकस्य पिष्टान्नस्य च सर्वशः दधिपायसमद्योत्त
विषजुष्टे तथैव च ५ केचित्त्विष्टं पयस्याहुरनुपानं सुखोदकं पयो मांसरसो वापि शालिमुद्गा
दिभोजिनां ६ युद्धाध्वातपसंतापविषमद्यरुजासु च माषादेरनुपानं तु धान्याम्लं दधिम

अनुपाने

स्तुवा ७ मैद्यं मद्याश्चिनानां च सर्वमांसेषु पूजितं अमद्यपानामुदकं फलाम्लं च प्रशस्य
ते ८ क्षीरं घर्माध्वभाष्यस्त्रीक्लांतानाममृतोपमं सुरा कृशानां स्थूलानामनुशस्तं मधूदकं ९
निरामयानां चित्रं तु भक्तमध्ये प्रकीर्तितं स्निग्धोष्णं मारुते शस्तं कफे रूक्षोष्णमिष्यते १० अ
नुपानं हितं चापि पित्ते मधुरशीतलं हितं शोणितपित्तेभ्यः क्षीरमिक्षुरसस्तथा ११ सर्वेषामनु

अंतरिक्षं

पानानां माहेंद्रं तोयमुत्तमं सात्म्यं वा यस्य यत्तोयं तत्तस्मै हितमुच्यते १२ उष्णं वाते कफे तोयं

हितं २

पित्ते रक्ते च शीतलं यथोक्तेनानुपानेन सुखमन्नं प्रजीर्यति १३ रोचनं बृंहणं वृष्यं दोषसंघात

वै॰दि॰ भेदनं तर्पणं मार्दवकरं श्रमक्लमहरं परं १४ दीपनं दोषशमनं पिपासाच्छेदनं परं बल्यं
वर्णकरं सम्यक् अनुपानं सदोष्णं १५ तदादौ कर्षयेत्पीतं स्थापयेन्मध्यसेवितं पश्चात्पीतं
बृंहति तस्माद्वीक्ष्य प्रयोजयेत् १६ स्थिरतां गतमक्लिन्नमन्नमद्रवपायिनां भवत्यबाधजन
नयनुपानमतः पिबेत् १७ अथ हंसोदकमाह तप्तं तप्तांशुकिरणैः शीतं शीतांशुरश्मिभिः
समंतादप्यहोरात्रमगस्त्योदयनिर्मलं १८ शुचि हंसोदकं नाम निर्मलं मलजिज्जलं नाभि
ष्यदि न वा रूक्षं पानादिष्वमृतोपमं १९ अनुपानं हितं युक्तं तर्पयत्याशु मानवं सुखं पचति
चाहारमायुषे च बलाय च २० पिबेयुरुदकं मुक्त्वा तद्विकारासिसृक्षितं स्नेहमाहारजं हि शीतं
त्वाभूयो दोषाय कल्पते २१ इत्यनुपानप्रकरणं अथ ऋतुचर्या शिशिरोऽथ वसंतश्च ग्रीष्मो
श्च वर्षाः शरद्धिमाः तत्र वस्थो माघफाल्गुनौ शिशिरः चैत्रवैशाखौ वसंतः ज्येष्ठाषाढौ ग्रीष्मः
श्रावणभाद्रपदौ वर्षाः इषोर्जौ शरत् मार्गपौषौ हेमंतः द्वितीयप्रकारः भाद्रपदाश्विनौ वर्षाः
कार्तिकमार्गशीर्षौ शरत् ॥ पौषमाघौ हेमंतः फाल्गुनचैत्रौ वसंतः वैशाखज्येष्ठौ ग्रीष्मः आषाढ

आवर्णोप्रावर २१ शीतेवर्षासुचाद्यांस्त्रीन्वसंतेन्त्यरसान्भजेत् स्वादुंनिदाघेशरदिस्वादुतिक्त
कषायकान् २२ अस्यार्थः हेमंतशिशिरवर्षासुस्वाद्वम्ललवणान् स्निग्धोष्णमन्नपानंभजेत्
वसंतेकटुतिक्तकषायरूक्षोष्णं ग्रीष्मेस्वादुशीतंस्निग्धं शरदिस्वादुतिक्तकषायरूक्षशीतं ग्
रीष्मवसंतेषुप्रायशोदधिगर्हितं हेमंतेशिशिरेचैववर्षासुदधिशस्यते २३ इतिऋतुप्रक
रणं अथदुग्धादिप्रकरणं अल्पाभिष्यंदिगोक्षीरंस्निग्धंगुरुरसायनं रक्तपित्तहरंशीतंमधु
ररसपाकयोः २४ जीवनीयंतथावातपित्तघ्नंपरमंस्मृतं गव्यतुल्यगुणंत्वाजंविशेषाच्छो
षिणांहितं २५ दीपनंलघुसंग्राहिश्वासकासास्रपित्तनुत् अजानामल्पकायत्वात्कटु
तिक्तनिषेवणात् २६ नात्यंबुपानाद्व्यायामात्सर्वव्याधिहरंपयः आविकंमधुरंस्निग्धं
गुरुपित्तकफावहं २७ पथ्यंकेवलवातेचकासेचानिलसंभवे अथमाहिषगुणः महाभिष्यं
दिमधुरंमाहिषंवह्निनाशनं २८ निद्राकरंशीतकरंगव्यात्स्निग्धतरंगुरु अथनारीस्तन्यगु
णः नारीणांमधुरंस्तन्यंकषायानुरसंहितं २९ स्तनपानात्सदापथ्यंजीवनंलघुदीपनं अ

वै॰वि॰ यसामान्यतः क्षीरपानप्रकारः प्रायः प्राभातिकं क्षीरं गुरुविष्टम्भिशीतलं ३० रात्रौसोम
गुणत्वाच्चव्यायामौभवनास्ततः दिवाकराभितप्तानांव्यायामानिलसेवनात् ३१ तद्वातानु
लोमघ्नंचचक्षुष्यंचापराह्णिकं तदेवोक्तंलघुतरंमनभिष्यंदिवैमतं ३२ वर्जइत्वास्त्रि
यस्तन्यमाममेवहितद्धितं धारोष्णंगुणवत्क्षीरंविपरीतमतोन्यथा ३३ तदेवातिश्रृतं
सर्वंगुरुबृंहणमुच्यते आविष्टगंधमम्लंचविवर्णंविरसंचयत् ३४ वर्ज्यंलवणंक्षीरंयच्च
विग्रथितंभवेत् इतिक्षीरगुणाः अथदधिगुणाः स्निग्धंविपाकेमधुरंदीपनंबलवर्द्ध
नं वातापहंपवित्रंचदधिगव्यंरुचिप्रदं ३५ अथमाहिषदधिगुणः विपाकेमधुरंब
ल्यंवातपित्तप्रसादनं बलासवर्द्धनंस्निग्धंविशेषाद्दधिमाहिषं ३६ अथाजदधिगु
णः दध्याजंकफपित्तघ्नंलघुवातक्षयावहं दुर्नामश्वासकासेषुहितमग्नेश्चदीपनं
३७ अथदधिसारगुणः दध्नः सारोगुरुर्वृष्योविज्ञेयोऽनिलनाशनः वन्हेर्विधमन

श्चापि कफशुक्रविवर्द्धनः ॥ ३८ सतात्क्षीरात्तु यज्जातं गुणवद्दधि तत्स्मृतं वातपित्त
हरं रुच्यं धात्वाग्निबलवर्द्धनं ३९ अथ नि:सारदधिगुण: दधि त्वसारं रूक्षं च ग्राहि
विष्टंभि वातलं स्वाद्वम्लमम्लकं मंदजातं तथासृतं क्षीरं भवेसरश्च असारमे
व दधि सत्त्वं चास्मिन्वर्गे स्मृता मस्तु गुणास्तथैव ६० इति दधिगुण: अथ तक्रगु
णा: स्वरसं निजलं घोलं माथितं रसवर्जितं पादोदकं मुदश्वित् तक्रमर्ध्वजलं भवेत्
घोलमारुतपित्तहारी मथीतं वातापहं श्लेष्मविनाशमुदश्विद्धितक्रं त्रिदोषापहं
अथ तक्रगुण: नैव तक्रं क्षते कासे चोष्णकाले न दुर्बले न मूर्छा मद दाह पुनरोगो रक्त
पैत्तिके ६१ शीतकालेऽग्निमांद्ये च कफोत्थे ह्यामयेषु च मार्गावरोधे दुष्टे च वायो तक्रं प्र
शस्यते ६२ वातोद्रेके सैंधवोपेतं स्वादु पित्ते सशर्करं पिबेत्तक्रं कफे वापि व्योषक्षारस
मन्वितं ६३ अथ तक्रकूर्चिकागुण: ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका ॥

सायं

कूर्चिकामूतक्षीरस्यघनभागः किलाटः भाषयाखोवेतिप्रसिद्धः१

महेरी१

वै॰वि॰ नक्राल्लघुतरोमंडः कूर्चिका दधितक्रजः ७४ अथकिलाटगुणः गुरुः किलाटोनिल हापुंस्त्वनिद्राप्रदः स्मृतः अथनवनीतगुणः नवनीतंपुनः सद्यस्त्विषदम्लंचशीत लं कषायमधुरंहृद्यंदीपनंलघुग्राहिच ७५ पित्तानिलहरंवृष्यंमविदाहिक्षयापहं का सश्वासशोषव्रणशोषज्वरतापंव्यपोहति ७६ इतिनवनीतगुणः अथगव्यघृतगुणाः विपाकेमधुरंशीतंवातपित्तविषापहं चक्षुष्यमग्र्यंबल्यंगव्यंसर्पिर्गुणोत्तरं ७७ अ थअजाघृतगुणाः आजंघृतंदीपनीयंचक्षुष्यंबलवर्द्धनं कासश्वासक्षयेचापिप थ्यंपाकेचतल्लघु ७८ अथमाहिषघृ॰ मधुरंरक्तपित्तघ्नंगुरुपाकेकफावहं वातपि त्तप्रशमनंसुशीतंमाहिषघृतं ७९ अथजीर्णघृ॰ पुराणंतिमिरश्वासपीनसज्वरकास हृत् मूर्छाकुष्ठविषोन्मादग्रहापस्मारनाशनं ८० एकादशशतंचैववत्सराननुषितंघृ तं रक्षोघ्नंकुंभसर्पिस्यात्परतस्तुमहाघृतं ८१ पेयंमहाघृतंभूतैः कफघ्नंपवनाधिकैः

बल्यं पवित्रं मेध्यं च विशेषात्तिमिरापह ५२ सर्वभूतहितं चैव घृतमेतत्प्रशस्यते अथ तैल
गु० स्नानपानांगमर्देषु तिलतैलं प्रशस्यते ५३ नद्धस्तिषु च पानेषु नस्ये कर्णाक्षिपूरणे
अन्नपानविधौ वापि प्रयोज्यं वातशांतये ५४ अथ एरंडतै० एरंडतैलं मधुरमुष्णं तीक्ष्णं
च दीपनं कटुकषायानुरसं सूक्ष्मं स्रोतोविशोधनं ५५ अथ सर्षपतै० कृमिघ्नं सार्षपं तैलं
कंडूकुष्ठापहं लघु अथ निंबतै० नास्यदं निंबजं तिक्तं कृमिकुष्ठकफप्रणुत् ५६ पावनः
स्थावराः स्नेहाः समासात्परिकीर्तिताः सर्वतैलगुणा ज्ञेयाः सर्वानिलविनाशकाः ५७
सर्वेभ्यस्त्विह तैलेभ्यस्तिलतैलं प्रशस्यते इति तैलगुणाः अथ मधुप्रकरणं पैत्तिकं भ्रा
मरं क्षौद्रं माक्षिकं क्षाद्रमेव च अर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ५८ माक्षि
कं तैलवर्णं स्यात्क्षौद्रं तु कपिलं भवेत् पैत्तिकं घृतसंकाशं श्वेतं भ्रामरमुच्यते ५९
बृंहणीयं मधु नवं नातिश्लेष्महरं सरं मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनं ६०

वै०वि० दोषत्रयहरं पक्वमामम्लं त्रिदोषकृत् तद्युक्तं विविधैर्योगैर्निहन्यादामयान्बहून् ६१ ना
नाद्रव्यात्मकत्वाच्च योगवाहि परं मधु उष्णैर्विरुध्यते सर्वं विषान्वयतया मधु ६२ उष्णा
तमुष्णैरुष्णे वा तन्निहन्ति विषं यथा तत्सौकुमार्याच्च तथैव शैत्यान्नानौषधीनां रससंभवा
च्च उष्णैर्विरुध्यते विशेषतश्च तथांतरिक्षेण जलेन चापि ६३ इति मधुगुणाः अथ इक्षु
प्र० अतीव मधुरो मूले मध्ये मधुर एव च अग्रेष्वक्षिषु विज्ञेय इक्षूणां लवणो रसः ६४
अविदाही कफकरो वातपित्तनिबर्हणः वक्त्रप्रह्लादनो वृष्यो दंतनिष्पीडितो रसः ६५
पक्वो गुरुः सरः स्निग्धः सतीक्ष्णः कफवातनुत् फाणितं गुर्वभिष्यंदि बृंहणं कफशुक्रलं
६६ गुडः सक्षारमधुरः स्निग्धः श्लेष्मकरो गुरुः हृद्यः पुराणः पथ्यश्च नवः श्लेष्मादि
रोगकृत ६७ दाहतृट्छर्दिमूर्छासृक्पित्तघ्नाः सर्वशर्कराः सर्वशर्कराः मत्स्यंडादयः
यथा यथैषां वैमल्यं मधुरत्वं तथा तथा ६८ स्नेहगौरवशैत्यादि निःसरत्वं तथा तथा॥

इतिक्षुगुणाः अथमांसप्रकरणं कषायमधुरोहृद्यः पित्तास्रकफरोगहा संग्राही
रोचनोवस्त्यस्तेषामेणोज्वरापहः ६९ मधुरोमधुरः पाके दोषघ्नोनिलदीपनः शीत
लोबद्धविण्मूत्रः सुगंधिर्हरिणोलघुः ७० शीतासृक्पित्तशमनीविज्ञेयामृगमात्रि
का सन्निपातक्षयश्वासकासहिक्कारुचिप्रणुत् ७१ नत्रबद्धमलाशीतालघवोजांग
लहिताः दीपनः कटुकः पाके ग्राहीरूक्षोहिमः शशः ७२ नातिशीतंगुरुस्निग्धंमांस
माजमदोषलं शरीरधातुसामान्यादनभिष्यंदिबृंहणं ७३ विपरीतमतोज्ञेयमा
विकंबृंहणंतुतत् अथविष्किरप्रकरणं ईषदुष्णगुरुस्निग्धाबृंहणावर्तिकादयः
७४ तित्तिरिस्तत्रप्रवरोमेधाग्निबलशुक्रकृत् ग्राहीवर्णानिलोद्रिक्तसन्निपात
त्विप्र२ ज्वरेहितः ७५ चटकामधुराः स्निग्धाः कफशुक्रविवर्द्धनाः सन्निपातहराश्चैवश
मनामारुतस्यच ७६ संग्राहीदीपनश्चैवकषायमधुरोलघुः लावैः कटुविपाकस्य लावा

पाठिना ६ पुलेरी ७ रोहू ५

वै॰वि॰ सन्निपातेषु पूजितः ७७ रक्तपित्तहरः शीतो लघुश्चापि कपिंजलः कपोतेषु चरोगे षु मंदवाते च शस्यते गोधा विपाके मधुरा कषाय कटुका स्मृता वातपित्त प्रशमनी बृंहणी बलवर्द्धिनी ७९ शल्यकः स्वादु पित्तघ्नो लघुः शीतो विषापहः प्रियको मारुते पथ्यो ऽजगरस्त्वर्शसो हितः ८० अथ मत्स्यादि प्रकरणं नादेया मधुरा मत्स्या गुरवो मारुतापहाः रक्तपित्तकराः सोष्णा वृष्याः स्निग्धाल्पवर्चसः ८१ रोहितो मारुतहरो नात्यर्थं पित्तकोपनः पाठिनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः ८२ दूषयेद्रक्तपित्तं तु कुष्ठरोगकरोऽस्य सौ मुरलो बृंहणो वृष्यः स्तन्यः श्लेष्मकरस्तथा ८३ सरस्तडागसंभूताः स्निग्धाः स्वादुरसाः स्मृताः महाह्रदेषु बलिनः स्वल्पे भस्य बलाः स्मृताः ८४ सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः उष्णा वातहरा वृष्या वर्चस्याः श्लेष्मवर्द्धनाः ८५ बलापहा विशेषेण मांसाशित्वात् समुद्रजाः सामुद्रजेभ्यो नादेया बृंहणत्वाद्गुणोत्तराः ८६ न च शुष्कं पूति व्याधि विषसर्पहतं विदग्धं वृद्धं जीर्णं कृशं बालानाम सात्म्यचारिणां मांसमद्यात्॥

६४

रभ्यान्येषामुपादेयंमांसं अरोचकंप्रतिश्यायंगुरुस्युष्कंप्रकीर्तितं विषव्याधिहतंमत्स्यंबालं
छर्दिंचकोपयेत् ८७ कासश्वासकरंवृद्धंत्रिदोषंव्याधिदूषितं क्लिन्नमुत्क्लेशजननंकृशंवात
प्रकोपनं ८८ उरोग्रीवंविहंगानांविशेषेणगुरुस्मृतं पक्षोत्क्षेपात्समोद्दिष्टोमध्यभागस्तुप
क्षिणां ८९ अतीवरूक्षंमांसंतुविहंगानांफलाशिनां बृंहणंमांसमत्यर्थंखगानांपिशिताशि
नां ९० मत्स्याशिनांपित्तकरंवातघ्नंधान्यचारिणां अथमगरीगुणः मगुरीवातहापथ्या
रुच्यावृष्याबलप्रदा अग्निसंजननीहृद्यातदुज्ञाराजसंज्ञिका ९१ इतिमांसगुणः अ
थफलप्रकरणं कषानुरसंरतेषांदाडिमंनातिपित्तलं दीपनीयंरुचिकरंहृद्यंवर्चोविबंध
नं ९२ द्विविधंतत्तुविज्ञेयंमधुरंचाम्लमेवच त्रिदोषघ्नंतुमधुरंमम्लंवातकफापहं
९३ इतिदाडिमगुणः अम्लंसमधुरंतिक्तंकषायंकटुकंसरं चक्षुष्यंसर्वदोषघ्नंदृश्यमा
मलकीफलं ९४ आदावंतेचमध्येचभोजनस्यापिशस्यते इत्यामलकगुणः कर्कंधुःको
लंबदरमामंपित्तकफावहं ९५ पक्वंपित्तानिलहरंस्निग्धंसमधुरंसरं पुरातनंतृड्

वै०वि०
९७

शमनंश्रमघ्नंदीपनंलघु ९६ इतिबदरगुणः आमंकपित्थमस्वर्यंकफघ्नंग्राहिवातलं
कफानिलहरंस्वादु पक्वंचमधुरंगुरु कासश्वासारुचिहरंतृष्णाघ्नंकंठशोधनं इतिकपित्थ
गुणः लघ्वम्लंदीपनंहृद्यंमातुलुंगमुदाहृतं ९८ हृद्यंवर्णकरंरुच्यंरक्तमांसबलप्रदं
इतिमातु० कषायानुरसंस्वादुवातघ्नंबृंहणंगुरु ९९ पित्ताविरोधिसंपक्वमाम्रंशुक्रवि
वर्द्धनं इत्याम्रगु० अम्लंसमधुरंहृद्यंविशदंभक्तरोचनं ७० वातघ्नंदुर्जरंप्रोक्तंनारं
गस्यफलंगुरु इतिनारंग० वातश्लेष्मविबंधघ्नंजंबीरंगुरुपित्तकृत् १ वृंताकंकोमलं
पथ्यंकुष्मांडंकोमलंविषं वातपित्तकरंशीतंविषंकूष्मांडकंफलं २ इतिकूष्मांड० अत्यर्थं
वातलंग्राहिजांबवंकफपित्तजित् इतिजंबूफल० कषायंस्वादुसंग्राहितिंदुकंवातकोप
नं ३ विपाकेगुरुसंपक्वंमधुरंकफपित्तनुत् इतितिंदुक० कफानिलहरंतीक्ष्णंस्निग्धं
संग्राहिदीपनं ४ कटुतिक्तकषायोष्णंबालंबिल्वमुदाहृतं विपाक्तदेवसंपक्वंमधु
रानुरसंगुरु ५ विदाहिविष्टंभकरंदोषकृत्पूतिमारुतं इतिबिल्व० बिंबीफलंश्वास

६५

वृष्यं स्तन्यकृत् कफपित्तजित् ६ इति बिंबीफलः तद्दाहज्वरपित्तासृक्कासश्वासवि
षापहं नारिकेलं गुरु स्निग्धं पित्तघ्नं स्वादु शीतलं ७ बलमांसप्रदं हृद्यं बृंहणं वस्तिशो
धनं इति नारिकेलं० द्राक्षा रुच्या सरा स्निग्धा मधुरा स्वर्या शीतला ८ रक्तपित्तज्वरश्वा
सतृष्णादाहक्षयापहा इति द्राक्षा० व्रण्यमुष्णं सरं मेध्यं दोषघ्नं सर्वकुष्ठनुत् ९ कषा
यं दीपनं चाम्लं चक्षुष्यं चाभयाफलं इत्यभयाफ० कषायमीषन्मधुरं किंचित्पूगफलं
सरं १० इति पूग० जातिफलं लवंगं च तिक्तं कटु कफापहं इति जातिफललवंगः स
तिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः ११ तद्वच्छाया मुखशोषे च वैरस्ये चापि पूजि
तः लताकस्तूरिका तद्वच्छीता वस्तिविशोधनाः १२ प्रियालमज्जा मधुरा वृष्या पि
त्तानिलापहाः इति फलप्रकरणं अथ शाकगुणाः पुष्पं लघूष्णं सक्षारं दीपनं व
स्तिशोधनं सर्वदोषहरं हृद्यं पथ्यं कूष्मांडजं मतं १३ इति कूष्मांडशाक० आला

वै०वि० बृहिन्नविङ्कञ्च रूक्षा गुर्व्यतिशीतला इत्यालाबुशा० सक्षारं मधुरं चैव शीर्णवृन्तं कफापहं १४
भेदनं दीपनं हृद्यं नाहाष्ठीलाघ्नं लघु मधुः शिरः सरास्तिनः शोफघ्नो दीपनः कटुः १५
इति शिग्रुशा० तेषु पुनर्नवाशाकं विशेषाच्छोफनाशनं मधुरं रसपाकाभ्यां रक्तपित्तमदापहं
१६ इति पुनर्न० तेषां शीतलमोरूक्षस्तंडुलायो विषापहः स्वादुः पाके रसे चैव बद्धो वातपित्तम
दापहः १७ इति तंडुलीय० उपोदकी सरा स्निग्धा बल्या श्लेष्मकरी हिमा इत्युपोदकीशा०
उपोदकीपोईन० कटुर्विपाके क्रिमिहा मेधाग्निबलवर्द्धनः १८ सक्षारः सर्वदोषघ्नो वा
स्तकारोचनः सरः चिल्ली वास्तुकवज्ज्ञेया पालक्या तंडुलीयवत् १९ कटुः कुष्ठक्रिमि
घ्नानि कफवातहराणि च फलानि बृहतीनां च कटुतिक्तलघूनि च २० इति बृहता०
कफपित्तहरं वर्ण्यमुष्णं तिक्तमवातलं पटोलं कटुकं पाके वृष्यं रोचनदीपनं २१ इति
पटो० कफवातहरं तिक्तं रोचनं कटुकं लघु वार्त्ताकं दीपनं प्रोक्तं जीर्णं सक्षारदीपनं २२

इतिवार्त्ताकं० ग्रहण्यर्शोविकारघ्नासाम्लावातकफेहिता उष्णायाश्च पायामधुराचांगेरी
चाग्निदीपना २३ इतिचांगेरी० वृंतोष्णकरीराक्तंकफहामधुरारसपाकतः विदाहिनोनाति
बलाः सकषायाविरूक्षणाः २४ अगस्त्यंनातिशीतोष्णंनक्तांधानांप्रशस्यते इत्य
ग० कारवेल्लंकटुतिक्तंदीपनंकफजित्सरं २५ इतिकारवे० कोशातकीसदापथ्याभेदि
नीवन्हिदीपिनी कफपित्तहास्निग्धास्तस्याएवांकुराः स्मृताः २६ अविदाहिविशेषो
ष्णंरक्तपित्तप्रसादनं विषंघ्निदुर्जरंरूक्षंविरसंमोहनावहं २७ गुरुविष्टंभिशीतो
चशृंगाटककसेरुको स्थूलकंदस्तुनात्यक्तः सूरणोगुदकीलह २८ मूलकं
मव्यक्तरसंकिंचित्क्षारंसतिक्तकं लशुनोभृशतिक्तोष्णः कटुपाकरससरः २९
हृद्यः केश्योगुरुर्वृष्यः स्निग्धोरोचनदीपनः इतिशाकगुणप्रकरणं अथसंयोग
विरुद्धप्रकरणं नवविरूढधान्यैर्वसामधुपयोगुडसर्पिर्ग्राम्यानूपोदकपिशितादी

शरदि ग्रीष्मे वा ८

वै०वि० निनाभ्यवहरेत् पयोमधुभ्यां वा सक्तुशाकं मधुनोष्णोदकानुपानं नाश्नीयात् सुराकृस
रापायसान्नैकध्ये सौवीरेणसह तिलशष्कुल्यो मत्स्यैसह इक्षुविकारान् गुडेन काकमाची
मधुना मूलकं गुडेन मधुना च वाराहीं क्षारेण मूलकं आम्रजांबवनैकध्यमश्नीयात्॥
सर्वान्मत्स्यान्पयसासह विशेषेण चिलिचिमं पयसासह कदलीफलं तालफलेन पयसा द
ध्नातक्रेण वा लकुचफलं दध्ना पयसा यूषेण वा मधुना घृतेन वा शाकं पयसः पयसोत्तरं वा
रतिसंयोगविरुद्धं अथ कर्मविरुद्धं कपोतान्सर्षपतैलभ्रष्टान्नाद्यात् कपिंजलमयूर
ल लावतित्तिरगोधाश्चैरंडदार्वीसिद्धान्नाद्यात् कांस्यभाजने दशरात्रपर्युषितं सर्पिर्मधुनो
ष्णे ऊरं हेडवा मत्स्यपरिपचने शृंगवेरपरिपचने वा सिद्धां काकमाचीं तिलकल्कमुपादि
काशाकं नारिकेलेन वा अथ मानविरुद्धं मध्वंबुनी मानतस्तुल्ये नाश्नीयात् स्नेहो
मधुस्नेहो जलस्नेहो वा विशेषादंतरिक्षोदकानुपानैः अथ रसपाकविरुद्धं मधु

राम्लौरसवीर्यविरुद्धौ मधुरलवणौच मधुकटुकौचसर्वतः मधुतिक्तौरसविपाकाभ्यां
मधुरकषायौचाम्ललवणौचरसतः अम्लकटुकौरसविपाकाभ्यां अम्लतिक्तौचाम्ल
कषायौसर्वतः लवणकटुकौरसविपाकाभ्यां लवणतिक्तौलवणकषायौच्चसर्वतः क
टुतिक्तौरसवीर्याभ्यां कटुकषायौतिक्तकषायौचसर्वतः अतिरूक्षातिशीतादिनानारू
क्षानिस्निग्धानिसेवेंपरिवर्जयेत् सात्म्यतोल्पतयावापिदीप्ताग्नेस्तरुणस्यच ॥
स्निग्धव्यायामबलिनांविरुद्धंतद्धितंभवेत् ३० अथवातगुणाः पूर्वःसमधुरः
स्निग्धोलवणश्चैवमारुतः गुरुर्विदाहजननोरक्तपित्तविवर्द्धनः ३१ मधुरश्चाविदा
हीचकषायोनुरसोलघुः दाक्षिणोमारुतःश्रेष्ठश्चक्षुष्योबलवर्द्धनः ३२ पश्चिमोमा
रुतस्तीक्ष्णः कफमेदोविशोषणः सद्यःप्राणक्षयकरःशोषिणस्तुशरीरिणः ३३ उ
त्तरोमारुतः स्निग्धोमृदुर्मधुरएवच कषायानुरसःशीतोदोषाणांचप्रकोपनः ३४

वै०वि० अथ आहारविधिः तत्राऽहारगुणः आहारः प्रीणनः सद्यो बलकृ[illegible] देहधारणः स्मृत्या
युःशक्तिवर्णौजः सत्त्वरूपविवर्द्धनः ३५ अथ भोजनस्थलमाह आसनास्थितमसंकी

जेमनस्थानं र्णमशुचिकार्यमहीनं से तत्रासैर्गुणसंपन्नैः भक्ष्यमन्नं स संस्कृतं ३६ शुचौ देशे समादाय भो
क्तुरग्रे निवेदयेत् यथोक्तगुणसंपन्नमुपसेवेत भोजनं ३७ विचार्य दोषकालादीन् कालयो
रुभयोरपि क्षुत्संभवति पक्वेषु रसदोषमलेषु च ३८ कालेवा यदि वा काले सोन्नकाल उदाहृतः
याममध्ये न भोक्तव्यं यामयुग्मं न लंघयेत् ३९ याममध्ये रसोत्पत्तिर्यामयुग्मे बलक्षयः त
त्र पात्रमाह दोषघ्नं विहरं पथ्यं हेमं भोजनभाजनं ४० रोप्यं भवति चक्षुष्यं पित्तहृत्कफवा
तजित् कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनं ४१ पित्तलं वातकृद्रूक्षमुष्णं क्रिमिकफप्र
त् तत्रादौ कारणमाह भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं ४२ अग्निसंदीपनं रुच्यं
जिह्वाकंठविशोधनं ॥ तत्रादौ मंत्रमाह अन्नब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः ४३

इति संचिन्त्य भुंजानो दृष्टिदोषैर्न बाध्यते अंजनागर्भसंभूतं कुमारं ब्रह्मचारिणं दृष्टिदो
षविघाताय हनूमंतं स्मराम्यहं ८४ अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसं मध्येम्ल
लवणौ पश्चात्कटुतिक्तकषायकान् ८५ घनपूर्वं समश्नीयात्कठिनं प्राक्ततो मृदु अं
ते पुनर्द्रवाशी स्याद्बलारोग्येन मुंचति ८६ सौमनस्यं बलं पुष्टिमुत्साहं रसनासुखं स्वा
दुसं जनयत्यन्नमस्वादुश्च विपर्ययं ८७ कुक्षेर्भागद्वयं भोज्यैस्तृतीयं पूरयेज्जलैः वा
योः संचरणार्थाय चतुर्थमवशेषयेत् ८८ भुक्तस्यादौ जलं पीतं कार्श्यमंदाग्निदोषकृत्॥
मध्येग्निदीपनं श्रेष्ठमंते स्थौल्यकफप्रदं ८९ कुर्यात्क्षीरान्नमाहारं दध्यन्नेन कदाचन ए
वं भुक्त्वा समाचामेच्छुद्धं ग्रहणपूर्वकं ९० आहारं षड्विधं चोष्यं पेयं लेह्यं तथैव च भो
ज्यं भक्ष्यं तथा चर्व्यं गुरु विद्याद्यथोत्तरं ९१ भुक्त्वा च संस्मरेन्नित्यमगस्त्यादीन् सुखाव
हान् अंगारकमगस्त्यं च पावकं सूर्यमश्विनौ ९२ पञ्चैतान्संस्मरेन्नित्यं भुक्तं तस्या
शु जीर्यति इत्याचार्यः स्वहस्तेन परिमार्ज्यं ततोदरं ९३ अनायासप्रदायीनि

वै०वि० कुर्यात्कर्माण्यतंद्रितंद्रितः रतेस्वप्नोत्थिते स्नाने भुक्ते वांते च संगरे ५४ सभायां विदुषां
राज्ञो कुर्यात्तांबूलभक्षणं अथ तांबूलगुणाः वक्त्रश्लेष्मास्यदौर्गंध्यमलवातश्रमापहं ५५
मुखवैशद्यसौगंध्यकांतिसौष्ठवकारकं पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः ५६ चू
र्णपत्रे हरत्यायुः शिरा बुद्धिविनाशिनी आयुरग्रे यशो मूले लक्ष्मीर्मध्ये व्यवस्थिता ५७ त
स्मादग्रं तथा मूलं मध्यं पर्णस्य वर्जयेत् आद्यं विषोपमं पीकं मध्यमं भेदि दुर्जरं ५८
अंतिकं खलु पानवं सुधातुल्यं रसायनं भुक्त्वा शतपदं गच्छेत्स्वैरं तेन तु जायते ५९
अन्नसंघातशैथिल्यं ग्रीवाजानुकटीसुखं भुक्त्वोपविशतस्तुंदं बलमुत्तानशायिनः
६० पार्श्वद्वये न चायुः स्यान्मृत्युर्भवति धावतः श्वासानष्टौ समुत्तानस्ततद्विः पार्श्वे
दक्षिणे ६१ ततस्तद्विगुणान्वामे पश्चात्स्वप्याद्यथासुखं शब्दान् रूपान् रसान् गंधा
न् स्पर्शांश्च मनसः प्रियान् भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति ६२ असंबुधा
नाद्विषमाशनाच्च संधारणात्स्वप्नविपर्ययाच्च कालेपि सात्म्यं लघु चापि भुक्तमन्नं न

६९

पाकं भजते नरस्य ६३ ईर्ष्याभयक्रोधपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन प्रद्वे
षयुक्तेन च सेव्यमानमन्नं न पाकं व्रजते नरस्य ६४ इति सारंगीवैद्यकृतौ वैद्यविनोदे नव
मः परिच्छेदः अथारिष्टप्रकरणं कालः सृजति भूतानि कालः संहरते प्रजाः कालः
सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः १ कालेनैव विनश्यंति सर्वे चासुरपन्नगाः न
रेंद्राः सर्वजीवाश्च सर्वे कालप्रणश्यति २ कालोग्निर्जठरे जातस्तस्य वांछा चतुर्विधा
पानीयाहारनिद्राश्च कामश्चैव चतुर्थकः ३ आहारं पचति शिखी दोषानाहारवर्जितः
पचति दोषक्षये तु धातून् प्राणान् तथा धातुक्षये ४ शरीरशीलयोर्यस्य प्रकृति
र्विकृतिर्भजेत् तत्त्वारिष्टं समासेन व्याख्यातस्तं निबोध मे ५ शृणोति विविधा
न् शब्दान् यो दिव्यानामभावतः समुद्रपुरमेघानामसंपतौ च निःस्वनान् ६
तान्स्वनान्नावगृण्हाति मन्यते चान्यशब्दवत् यस्तूष्णमिव गृण्हाति शीत
मुष्णं च शीतवत् ७ संजातशीतपिटकोयश्च दाहेन पीड्यते उष्णगात्रोति

वैं०वि० मात्रेणशीतेनैवप्रवेपते ८ प्रहारान्नाभिजानातियोंगछेदमथापिवा पांसुनेवा
वकीर्णानियस्यगात्राणिमन्यते ९ वर्णान्यत्वंचभजतेयस्यगात्रमहेतुतः स्नातानु
लिप्तंयंचापिभजंतेनीलमक्षिकाः १० सुगंधिर्वातिवाकस्मात्तमु र्वतिगतायुषं ११
विपरीतेनगृण्हातिरसान्यश्चोपयोजितान् १२ उपयुक्ताः क्रमोयस्यरसादोषा
भिवृद्धये यस्यदोषाग्निमांद्यंचकुर्युर्मिथ्योपयोजिताः १३ योवारसान्नसंवेत्तिस
गतायुप्रवक्ष्यते सुगंधिवेत्तिदुर्गंधिदुर्गंधिंचसुगंधितो १४ गृहीतेयोन्यथागंधं
शांतेदीपेचनीरुजः हिमादीनिहिंदूानिकालावस्थादिशस्तथा १५ विपरीतानिगृ
ण्हातिभावानन्यांश्चयोनरः दिव्यज्योतींषियश्चापिज्वालितानिनपश्यति १६ रात्रौ
सूर्यंप्रज्वालितंदिवावाचंद्रवर्चसं अमेघोपप्लवेयश्चशक्रचापतडिद्गुणान्
१७ विमानयानप्रासादैर्यश्चसंकुलमंबरं यश्चानिलंमूर्तिमंतमंतरिक्षंचपश्य
ति १८

२०

धूमनीहारवासोभिरावृतामिव मेदिनी प्रदीप्तमिव लोकं च यो वा स्रुतमिवांभसा १९ न

संपश्यति नक्षत्राणि यश्च देवीमरुंधतीं ध्रुवमाकाशगंगां वा तं वदेद्गितायुषं २० ज्यो

त्स्नादर्शोष्णतोयेषु छायां यश्च न पश्यति पश्यत्येकांगहीनां वा विकृतां वान्यसत्वजां २१

यो वा मयूरकंठाभं विधूमं वह्निमीक्षते आतुरश्चेन्नरं जन्तुः स स्वस्थो व्याधिमवाप्नुया

त् २२ श्यावा लोहितका नीला पीतिका वापि मानवं अभिद्रवंति यच्छायास परासुरसं

शयः २३ नश्यते ह्रीः श्रियो यस्य तेजोजः संस्मृतिः प्रभा अकस्मात्तं भजेद्वा स प

रासुरसंशयः २४ यस्याधरोष्ठः पतितः क्षिप्तः श्चोर्द्ध्वं तथोत्तरः उभौ वा जंबवाभा

सौ दुर्लभं तस्य जीवितं २५ आरक्तादशना यस्य श्यावा वा स्युः पतंति वा खंजनप्रति

मा वापि तं गतायुषमादिशेत् २६ कृष्णा स्तब्धा चलिप्ता वा जीह्वा शून्या च यस्य वै क

र्कशा च भवेद्यस्य सोचिराद्विजहात्यसून् २७ कुटिला स्फुटिता वापि शुष्का वा य

स्य नासिका अवस्फूर्जीत मग्ना वा न स जीवति मानवः २८ संक्षिप्ते विषमे

वै०वि० स्तब्धरक्तेक्षणस्तत्चलोचने स्यातांवा प्रस्नुते यस्य स गतायुर्न रोधक्रवं २९ केशाःसी
मंत्ति नो यस्य संस्थिते विषमे भ्रुवौ लुलंति चाक्षिपक्ष्माणि सोचिराद्याति मृत्युतां
३० नाहरसन्नमास्यस्थं नाधारयति यःशिरः सकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान्
जहाति सः ३१ बलवान्दुर्बलोपि संमोहयाविगच्छति उत्थाप्यमानो बहुशस्तंप
चं भिषगादिशेत् ३२ उत्तानःसर्वदाशेते पादौ विकुरुते च यः विप्रसारणशीलो वा
न स जीवितुमर्हति ३३ शीतपादकरो यस्तु संच्छिन्नाश्वासश्च यो भवेत् काकोच्छ्वा
सश्च यो मर्त्यस्तं धीरः परिवर्जयेत् ३४ निद्रा नच्छिद्यते यस्य यो वा जागर्ति सर्वदा
मुह्येद्वा वक्तुकामश्च प्रत्याख्येयः सुजानता ३५ उत्तरोष्ठं च यो लिह्याद्‌दुजारं
श्च करोति यः प्रेतैर्वा भाषते सार्द्धं प्रेतरूपं समादिशेत् ३६ स्वभ्रःसरोमकूपे
भ्यो यस्य रक्तं प्रवर्त्तते पुरुषस्याविषार्त्तस्य सद्यो जह्यात्स जीवितं ३७ वातष्ठी
लानुहृदये यस्योर्द्ध्वमनुयायिनी रुजान्नविद्वेषकरी सगतायुर्न संशयः ३८

अनन्योपद्रवकृतः पादेशोथः समुत्थितः पुरुषं हंति नारी तु मुखजो गुह्यजो द्वयः ३९
अतिसारोज्वरो हिक्का छर्दिर्भूनांउमेढता कासिनः श्वासिनो वापि यस्य तं तीक्ष्णमादिशे
त् ४० स्वेदोदाहश्च बलवान् हिक्काश्वासस्च मानवं बलवंतमपि प्राणो विलुपंते संश
यः ४१ श्यामा जिह्वा भवेद्यस्य सव्यं चाक्षि निमज्जति मुखं च जायते पूति यस्य तं परि
वर्जयेत् ४२ वक्रमापूर्यते श्रूभिः स्विद्यतश्चरणावुभौ चक्षुश्चाकुलतां याति
यमराष्ट्रं गमिष्यतः ४३ पंकमत्स्यवसातैलघृतगंधाश्च येनराः मिष्टान्नोधां
श्चयवांतिगंतारस्तेयमालयं ४४ यूकाललाटमायांति बलिं नाश्नंति वायसाः येषां
चापि रतिर्नास्ति यातारस्ते यमालयं ४५ ज्वरातीसारशोफाश्च यस्यान्योन्यावसादि
नः प्रक्षीणबलमांसस्य नैव शक्यं चिकित्सितं ४६ क्षीणस्य यस्य क्षुत् तृष्णे
हृद्यैर्मिष्टैर्हितैस्तथा न शाम्यतोन्नपानैश्च तस्य मृत्युरुपागतः ४७ प्रवा

हिक्काशिरःस्थूलंकोष्टशूलंचदारुणं पिपासाबलहानिश्चतस्यमृत्युरुपागतः ४८ प्रेताभूताःपिशाचाश्चरक्षांसिविविधानिच मरणाभिमुखंनित्यमुपसर्पंतिमानवं ४९ तानिभेषजवीर्याणिप्रतिघ्नंतिजिघांसया तस्मान्मोघाःक्रियाःसर्वाभवंतिविगतायुषः ५० अन्नहीनोदेहस्तेजःशोणितंचांबुहीनतः कामहीनोदेहश्चस्फुरनिद्रारोगकारिणी ५१ पाणिपादौतथास्फोटोदाहःस्वल्पतरःस्मृतः जिव्हागोमलमायातिसरोगीनहिजीवति ५२ स्वरहीनोज्वरोयस्यनासाश्वासःप्रवर्तते कंठापिकफहीनस्तुसरोगीजीवतेध्रुवं ५३ निद्रासौम्याभवेद्यस्यशरीरस्योष्मस्तथा इंद्रियाणिप्रसन्नानिसरोगीनविनश्यति ५४ अनिलोयातिपित्तस्यपित्तंयातिकफगृहे कफश्चकंठमायातिदुर्लभंतस्यजीवितं ५५ चैतन्यंसकलंयस्यगंधस्वादुस्फुटंभवेत् कफपूरितकंठश्चस्यसजीवेन्नात्रसंशयः ५६ रात्रौदाहोभवेद्यस्यदिवाशीतस्तुजायते कफपूरितकंठश्चतस्यमृत्युर्भविष्यति ५७ हृदयंचतथानासापाणीपादौचशीतलौ शिरस्तापा

भवेद्यस्य तस्य मृत्युर्भविष्यति ५८ हुंकारः शीतलो यस्य फुत्कारो वह्निसंयुतः महादा
हो भवेद्यस्य तस्य मृत्युर्भविष्यति ५९ अंगवृद्धौ गतेर्भंगो वर्णस्यावर्ण्यमेव च गंधस्वादं
न जानाति स गतायुर्भविष्यति ६० शीर्षस्वेदो भवेद्यस्य मुखे वायुर्गतिर्बहु शरीरे चापि
दौर्बल्यं स गतायुर्भविष्यति ६१ अरुंधतीं भवेज्जिव्हा ध्रुवो नासाग्रमुच्यते भ्रुवोर्म
ध्यो विष्णुपदं नासिका मातृमंडलं ६२ नासा वक्रा भवेद्यस्य मुखे वै कुंकुमारुणं ईद
शं लक्षणं यस्य तस्य मृत्युरुपागतः ६३ वर्णहानोति कामश्च स्वादहीनस्तथैव च
त्रिभिर्मासैश्च सो जीवस्य श्वा कृच्छे यमालयं ६४ यः कृत्तिका मूल मघा विशाखा सा
भरणी पीतेकौ द्रा सु भूज्जं गदष्टः स वैननैयेन सुरक्षितोपि प्राप्नोति मृत्योर्दशनं मनुष्यः ६५
मार्गपौषे तथा माघे स्वाषाढे श्रावणे पि च भाद्रे मासि भिषग्वर्यैर्वा युरा जा प्रकीर्तितः
६६ आश्विने कार्त्तिके मासि वैशाखे ज्येष्ठके ध्रुवं वैद्यशास्त्रविचारज्ञैः पित्त

वै०वि० राजाप्रकीर्त्तितः ६७ फाल्गुने चैत्र मासे तु जंतु पीडा करो मतः शीतापह समस्तं ते स्त्रे
ष्मा राजा प्रकीर्त्तितः ६८ स्वभावप्रसिद्धानां शरीरैकदेशानामन्यथा भावो मरणाय न
यथा शुक्लानां कृष्णत्वं कृष्णानां शुक्लत्वं रक्तानामन्यवर्णत्वं स्थिराणामस्थिरत्वं मृदू
नां कठिणत्वं बलानामबलत्वं अचलानां चलत्वं पृथूनां संक्षिप्तत्वं संक्षिप्तानां पृथुत्वं
दीर्घानां ह्रस्वत्वं ह्रस्वानां दीर्घत्वं मपतनधर्मिणां पतनधर्मित्वं नासावंशे लला
टे चापिडकोत्पत्तिः ललाटे प्रभातकाले वा स्वेदः नेत्ररोगविनाशप्रवृत्तिः गोमय
चूर्णप्रकाशस्य वा रजसो दर्शनमुत्तमांगे स्तनमूलहृदयोरस्रस्य शूलोत्पत्तिः अ
र्द्धांगे वेपथुः शेषांगपक्षयोर्वा नष्टहीन विकल विकृतस्वरता विवर्णपुष्पप्रार्भावो वा
दंतमुखनखशरीरेषु यस्य चाप्सु कफमूत्रपुरीषरेतांसि निमज्जंति यस्य दृष्टिमंड
ले भिन्नविकृतानि रूपाण्यालोचयते स्नेहाभ्यक्तकेशांग इव यो भाति यश्च दुर्बलो भ

क्रान्तीसाराग्न्योपीड्यते कासमानश्च तृष्णाभिभूतः क्षीणश्छर्दस्य विदग्धमतिसार्य
ते वा ज्वरकासाभिभूतः श्वासी म्रियते आक्षिप्यमान हृदयश्च दृष्ट्वा शरीरो वा यश्च लो
ष्टेन लोष्टमभिहन्ति काष्ठेन काष्ठं तृणानि छिनत्ति सधरोष्ठं दधस्फुत्तरोष्ठं वा लेढि आलुंच
ति कर्णौ केशांश्च देवगुरुद्विजसुहृद्वेष्टा च द्वेष्टि चिकित्समानस्य विकारो योभिव
र्द्धते प्रक्षीणबलमांसस्य लक्षणं तत्क्षतायुषः निवर्तते महाव्याधिः सहसा यस्य देहिनः
न चाहारफलं वस्य दृश्यते स विनश्यति ६९ एतान्यरिष्टरूपाणि सम्यग्यो वेत्ति वैद्यराट्
साध्यासाध्यपरीक्षायां स राज्ञः संमतो भवेत् ७० इत्यरिष्टं अथ छायालक्षणं येन विज्ञा
नमात्रेण त्रिकालज्ञो भवेन्नरः कालो दूरस्थितस्यापि येनोपायेन लक्षयेत् ७१ तं वक्ष्यामि
समासेन यथोद्दिष्टं स्वके गृहे एकान्ते विजने गत्वा कृत्वादित्यं च पृष्ठतः ७२ निरी
क्ष्यतो निजच्छायां कंठदेशे समाहितो ततश्चाकाशमीक्षेत नरः पश्यति शंकरं ७३

वै०वि० ॐ ह्रीं ब्रह्मणे नमः इत्यष्टोत्तरशतं जप्त्वा ततो दृश्यते शुद्धस्फटिकसंकाशं नानारूप
धरं हरं षण्मासाभ्यासयोगेन भूचराणां पतिर्भवेत् ७४ वर्षद्वयेन येनायं कर्ता स्वयं प्र
भुः त्रिकालज्ञमाप्नोति परमात्मानमेव च ७५ संतताभ्यासयोगेन नास्ति किंचित्सु
दुर्लभं तद्रूपं कृष्णवर्णं ये पश्यन्ति व्योम्नि निर्मले ७६ षण्मासान्मृत्युमाप्नोति स यो
गी नात्र संशयः पीते व्याधिभयं रक्ते नीले हन्याद्विनिर्दिशेत् ७७ नानावर्णस्वरूपे सि
द्धिर्गाजायते महान् पादचक्षुर्जानुयुग्मं विना नाशकरी भवेत् ७८ अष्टवर्षेण
वर्षेण क्रमाद्वर्षद्वयेन च विनष्टे दक्षिणे बाहौ स्वबंधुर्म्रियते ध्रुवं ७९ वामबाहो
तथा भार्या विनश्यति न संशयः शिरोदक्षिणबाहुभ्यां विनाशो मृत्युमादिशेत् ८०
अक्षिते मासि मरणं विना जंघे दिने नव अनिर्द्धं स्कंधलोपे स्यात् छायालोपे च
तत्क्षणात् ८१ इति छायापुरुषलक्षणं इति सांगोवैद्यकृते वैद्यविनोदे दशमः परिच्छेदः॥

२४

अथज्वरनिदानचिकित्सारसाश्चकथ्यंते ज्वरस्त्रिपादस्त्रिशिराः षड्भुजोनवलोचनः
भस्मप्रहरणोरौद्रः कालांतकयमोपमः १ रुद्रकोपाग्निसंभूतः सर्वप्राणिप्रतापनः
नैस्तैर्नामभिरन्येषांसत्वानांपरिकीर्त्तितः जन्मादौनिधनेचैवप्रायोविशतिदेहिनं अतः
सर्वविकाराणांज्वरोराजेतिकीर्त्तितः २ दोषैःपृथकुसमस्तैश्चद्वंद्वैरागंतुरेवच अ
नेककारणोसन्नोज्वरस्त्वष्टविधोमतः ३ दोषाःप्रकुपिताःस्वेषुकालेषुस्वैःप्रकोपनैः
व्याप्यदेहमशेषेणज्वरमापादयंतिहि ४ स्रोतसांमार्गमावृत्यमंदीकृत्यहुताशनं निर
स्यबहिरुष्माणंपंक्तिस्थानाच्चकेवलं ५ शरीरंसमभिव्याप्यस्वकालेषुज्वरागम
जनयंतसयथावृद्धिंसवर्णाश्चत्वगादिषु ६ मिथ्याभियुक्तैरपिचस्नेहाद्यैःकर्मभि
र्नृणां विविधाद्भिघातांच्चरोगस्थानात्सपाकतः ७ श्रमात्क्षयाद्वजीर्णाच्चविषात्सा
त्म्यर्तुपर्ययात् ओषधीपुष्पगंधाच्चकोपान्नक्षत्रपीडया ८ अभिशापाभिचा
अभिचारप्रयोगादिकारनान् अभिसंगाकोउन्याःप्रेतादि

व्यायामैश्चातिवादे द्विरुगकोर्थः पीउा १

वै०वि० ताभ्यां मनोभूताभिशंकया स्त्रीणामपत्यजानां प्रजातानां न धाहितैः ९ स्तन्यावतरणे
चैव ज्वरो दोषैः प्रकुप्यति अथ ज्वरीलक्षणं रुणद्धि चर्ययो धातून्मेदो रुसनुपाव
के भवत्यस्य तप्तगात्रस्तु न चास्विद्यति सर्वशः १० अथ सामान्यतो ज्वरकारणमाह
मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः कोष्ठाद्बहिर्निरस्याग्निं ज्वरदास्स्युरसो
नुगाः ११ अथ सामान्यतः ज्वरस्य लक्षणं स्वेदावरोधः संतापः सर्वांगग्रहणं त

नद्रमुस्ता१ था विकारो युगपद्यत्र स ज्वरः परिकीर्त्तितः अथ सामान्यतः ज्वरस्य पूर्वरूपं जृंभो

जेतो१ गमर्दो गुरुता रोमहर्षोऽरुचिस्तमः अप्रहर्षश्च शीतं च भवत्युत्पद्यति ज्वरे १२

अथ वातज्वरनिदानमाह रुक्षोत्स्तिक्तैः कषायैः कटुभिरनशने वेगसंधारणे

मैथुन२ श्च व्यायामैश्च व्यवायैः प्रतरणबलवद्विग्रहे जागरैश्च ॥ श्यामानी वारैर्क्ष्णुप्र

परिश्रमे१ भैतिभिरशने ह्लसद्भिः पयोदैरन्ने जीर्णे च पन्नो रितिर्भवति ततो मारुतस्य प्रकोपः १४

कटु३ तिक्षण३ भोजन४ साधारणेश्च मूत्रपुरीष३

प्रतरनकोर्थः २ तरंण मुषःवैरस्यकोर्थः फीक:२ २५

साबाराका
कोट्टं तन
भाग्य २

उत्कसारि:धातमानैः छिक्कास्तंभः २ सुक्तकोर्थः क्षिरका ४ प्रभातिकोर्थः अद्भिः कांजी ४
पयोदैः मेघैः ४
श्री

इति वातज्वरनिदानं अथ वातज्वरोपद्रवाः वेपथुः विषमोवेगः कंठोष्ठपरिशोष
णं निद्रानाशः क्षवः स्तंभो गात्राणां रौक्ष्यमेव च १५ शिरोहृद्गात्ररुग्वक्त्रवैरस्यं गाढविट्क जलड
ता शूलाध्माने जृंभणं च भवत्यनिलजे ज्वरे १६ अथ पित्तज्वरनिदा० कट्वम्लोष्ण
तीक्ष्णारा विदाहितीक्ष्णलवणक्रोधोपवासातपस्त्रीसंपर्कतिलातसीदधिसुराशुक्तारनालादि
जिकादि ४ भिः भुक्ते जीर्यति भोजने शरदि च ग्रीष्मे सति प्राणिनां मध्यान्हे च तथार्द्धरात्रसमयेपि
अन्नपचमा प्रकोपो भवेत् १७ इति पित्तज्वर० अथोपद्रवाः वेगस्तीक्ष्णोतिसारश्च निद्राल्पत्वं
नेसति ५ तथा वमिः कंठोष्ठमुखनासानां पाकः स्वेदश्च जायते १८ प्रलापः कटुता वक्त्रे मू
र्छा दाहो मदस्तृषा पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च १९ इति पित्त० अथ कफज्व
सीतल२ रनिदानं गुरुमधुरस्त्रैशीतैर्दुग्धदध्यादिपानैः स्निग्धैर्विकृतिनवान्नैः पायसैः पिष्टभक्षैः
लवणादिवसस्वप्नैर्भक्ष्यपदुष्टैः प्रभाते भवति कफविशेषो हेतुभिर्वा वसंते २० अथो

अहोरात्रयोःपूर्वभागे १ नवअन२ पीना२

वै०वि० पद्रवाः गौरवंशीतमुत्क्लेशोरोमहर्षोतिनिद्रता स्रोतोरोधोविरुल्पत्वंप्रसेकोमधुरास्य
ता २१ नात्युष्णगात्रतांछर्दिरंगसादोविपाकता प्रतिश्यायोरुचिः कासोकफजेक्ष्णा
दिशुक्लता २२ इतिकफज्वरः० अथद्वंद्वान्याह तत्रादौवातपित्तज्वरलक्षणं जृंभाध्मा
नंमदोत्कंपपर्वभेदपरिक्षयाः तृट्प्रलापाभितापास्युर्ज्वरेमारुतपैत्तिके २३ इति
वातपित्तापद्र० अथवातकफज्वरल० शूलकासकफोत्क्लेशशीतवेपथुपीनसाः
चक्रदत्तम: गौरवारुचिविष्टंभाः स्युर्मरुत्कफसंभवे २४ इतिवातकफः० अथकफपित्तज्वरः०
शीतदाहारुचिश्छर्दिस्वेदमोहमदभ्रमाः कासांगसादहृल्लासाभवंतिकफपैत्तिके
२५ इतिकफपित्तज्वरः० इतिद्वंद्वलक्षणं अथलंघनविचारः आमाशयस्थोहत्वाग्निं
सामोमार्गान्विधापयन् विदधातिज्वरंदोषस्तस्माल्लंघनमाचरेत् २६ त्रिविधंत्रिविधे
दोषेतत्समीक्ष्यप्रयोजयेत् दोषेल्पेलंघनंपथ्यंमध्येलंघनपाचने २७ प्रभूतेशो

घनेनत्वचमूलादुन्मूलयेन्मलान् तरुणंतुज्वरंपूर्वंलंघनेनक्षयंनयेत् २८ आमदोषम
लिंगाढ्यंलंघयीतयथाविधि उक्तंच ज्वरादौलंघनंकार्यंज्वरमध्येनुपाचनं ज्वरांतेरेचनं
दद्यात्कोष्ठशुद्ध्यैयथाबलं २९ परेपि सर्वज्वरेषुप्रथमंकार्यंशक्ररलंघनं क्वथितोदकपा
नेचतथानिर्वातसेवनमिति ३० ज्वरस्यप्रथमेरूपेभेषज्यंनादिनत्रयं नदेयंक्वथितंतोयं
वदंतीहिभिषग्वराः ३१ मुख्यभेषज्यसंबंधनंकुर्यात्तरुणज्वरे तोयपेयादिसंस्कारे
निर्दोषंतत्रभेषजं ३२ नकषायप्रशंसंतिनराणांतरुणज्वरे कषायेनाकुलीभूतादो
षाजेतुंसुदुस्तराः ३३ उक्तंवाग्भटेन दोषावद्धाःकषायेणस्तंभितास्तरुणज्वरे स्त
भ्यंतेनविपच्यंतेकुर्वंतिविषमज्वरमिति ३४ त्रिसप्ताहेव्यतीतेचदोषपित्तनुतांगते
जीर्णसंज्ञांसलभतेज्वरेदेयंतदौषधं ३५ अत्रैवचरकेः मृदौज्वरेलघौदेहेस्तप्र
बलेषुमलेषुच पक्वंदोषंविजानीयाज्वरेदेयंतदौषधमिति ३६ सुश्रुतोपि•

दोषप्रकृतिर्दोषाणांस्वमार्गसंस्पर: ६

वै॰वि॰ बहुदोषस्यमंदाग्ने: सप्तरात्रात्परंज्वर: लंघनांबुयवागूभिर्यदादोषोनपच्यते ३७ न
दातंमुखवैरस्यतृष्णारोचकनाशनै: कषायै: पाचनैर्हृद्यैर्ज्वरघ्नै: समुपाचरेदिति ३८
सप्तरात्रेणपच्यंतेसप्तधातुगतामला: निरामस्तेनतेन: प्रोक्तोज्वर:प्रायोष्टमेदिने ३९
अथमलपाकलक्षण दोषप्रकृतिवैकृत्यलघुताज्वरदेहयो: इंद्रियाणांचवैमल्यम
लानांपाकलक्षणं अथनिरामदोषलक्षणं क्षुत्क्षामतालघुत्वंचगात्राणांज्वरमार्दव
दोषप्रवृत्तिरुत्साहोनिरामज्वरलक्षणं तस्यपाकविधिमाह वातिक: सप्तरात्रेणदशरा
त्रेणपैत्तिक: श्लैष्मिकोद्वादशाहेनज्वर: पाकंनियच्छति ४० आसप्तरात्रात्तरुणंज्व
रमाहुर्मनीषिण: मध्यंद्वादशरात्रंतुपुराणंतुतत: परं ४१ वातिकेसप्तरात्रेणदशरा
त्रेणपैत्तिके श्लैष्मिकेद्वादशाहेनज्वरेभुंजतिभेषजं ४२ पाचनंशमनंचैवशोधनं
हियथाक्रमं ज्ञात्वासमययेमतेषांकुर्याद्वैद्यश्चिकित्सितं ४३ तेषांलक्षणमाह

४०

यस्य चस्याममाहारं पचेदामरसंचयात् यदपक्कान्यचेद्दोषान्तद्धिपाचनमुच्यते ४४
नशोधयति यद्दोषान्समान्नोदीरयत्यपि शमीकरोति संवृद्धान्शमनं हि तदुच्यते ४५
स्थानाद्बहिर्नयेदूर्ध्वमधो वा मलसंचयं संशोधनं तदेव स्याद्देवदालिफलं यथा ४६
तेषां प्रधानसमयमाह पाययेदातुरं साम पाचनं सप्तमे दिने शमनेनाथवा दद्यान्निरामं
तमुपाचरेत् ४७ कृशं चैवाल्पदोषं च शमनीयैरुपाचरेत् दोषशोधनसाध्यं तु यं विद्याद्दो
षदुर्बलं ४८ तं समीक्ष्य भिषक्कुर्याद्दोषप्रच्यावनं मृदु तेषां निषेधमाह लालाप्र
सेको हृल्लासो हृदयाशुद्ध्यरोचकौ तन्द्रालस्याविपाकश्च वैरस्यं गुरुगात्रता ४९ क्षुन्ना
शो बहुमूत्रत्वं स्तंभता बलवान्ज्वरः आमज्वरस्य लिंगानि नेंद्यात्तत्र भेषजं ५० भे
षजं ह्यामदोषस्य भूयो जनयति ज्वरं आमलक्षणं आहारस्य रसः सारो यो न पक्वोऽग्नि
लाघवात् आमसंज्ञां स लभते बहुव्याधिसमाकुलः ५१ अन्योपि आममन्ये रसं

वै० वि० केचित्केचित्तु मलसंचयं प्रथमो दोषपुष्टिं वा केचिदामं प्रचक्षते ५२ अत्राह चरकः पा
यपद्दोषकरणं मोहादामज्वरे तु यः सस्कंभं कृष्णसर्पं तु कराग्रेण परामृशेत् ५२ अवस्य
मेव कुर्वीत ज्वरी सामे समीरणे लंघनं त्वामपाकार्थं न तदूर्ध्वं यथा कफे ५३ उक्तं पूर्वं:
कफपित्तोद्भवे धातुः सहते लंघनं बहु आमक्षयादूर्ध्वमपि वायुर्न सहते क्षणं ५४ लंघन
स्य फलमाह लंघनेन क्षयं नीते दोषे संधुक्षितेऽनले विज्वरत्वं लघुत्वं च क्षुधा चैवोपजायते
५५ अनवस्थितदोषाग्नेर्लंघनं दोषपाचनं ज्वरघ्नं दीपनं कांक्षारुचिलाघवकारकं ५६
क्वथितोदके निर्वातयोः फलमाह क्वाथ्यमानं तु निर्वेगनिःफेनं निर्मलं तथा अर्द्धावशिष्टं
यत्तोयं तदुष्णोदकमुच्यते ५७ ज्वरकासकफश्वासवातपित्तामभेदसां नाशनं वह्निसंशो
धि पथ्यमुष्णोदकं सदा ५८ परं च सामान्यतो ज्वरी पूर्वं निर्वातेऽनिलसेवनात् निर्वातमा
युषो वृद्धिमारोग्यं कुरुते सदा ५९ व्यजनस्यानिलस्तृष्णास्वेदमूर्छाश्रमापहः अथ सु

५९

असादोदुरबलत्वं ६

ल्लितफलमाह वातमूत्रपुरीषाणांविसर्गोगात्रलाघवं हृदयोद्गारकंठस्यशुद्धौतंद्र
क्लमेगते ६० स्वेदयातेरुचौवापिक्षुत्पिपासामहोदये कृतंलंघनमादेश्यंनिर्विशे
च्यांतरात्मनि ६१ अथहीनलंघनलक्षणमाह कफोत्क्लेशः स्वहृत्त्रासोष्ठीवनंचमुहुर्मु
हुः कंठास्यहृदयाशुद्धिस्तंद्रास्याद्धीनलंघने ६२ अतिलंघितलक्षणमाह पर्वभेदो
गमर्दश्चकासः शोषोमुखस्यच क्षुत्प्रणाशोऽरुचिस्तृष्णादौर्बल्यंश्रोत्रनेत्रयोः ६३ म
नसः संभ्रमोभीक्ष्णमूर्ध्ववातस्तमोहृदि देग्निहार्बलंहानिश्चलंघनेतिकृतेसति ६४
अथालंघनीयानाह तद्भिमारुततृष्णाक्षुन्मुखशोषभ्रमान्वितैः नाकार्यंगुर्विणी
बालवृद्धदुर्बलभीरुभिः ६५ नक्षयाध्वश्रमक्रोधकामशोकसमुद्भवे अथागतुक
ज्वरविचारः आगंतुकज्वरेनैवनरः कुर्वीतलंघनं लंघनंनहितंकामशोकचिंताप्रहा
रजे ६६ भयभूतश्रमक्रोधसंभूतेलंघनेज्वरे हितंनकिंतुदीप्ताग्नौयथामांसरसोदनं
६७

वै०वि० अभिघाताज्वरे पुंजातक्रियां पुष्टिविवर्द्धनीं औषधीगंधविषजे विषपित्तप्रकोपजैः
६८ जयेत्कषायैर्मतिमान् सर्वगंधकृतैर्भिषक् सर्वगंधानाह चातुर्जातसकर्पूरकं
कोलागरुकुंकुमं ६९ लवंगसहितं चैतत्सर्वगंधं विनिर्दिशेत् तेषामुपद्रवाः
शावास्पतां विषकृते दाहातीसारहृद्रुजाः ७० अमतृरुक्पिपासा च तोदो मूर्छाबल
क्षयः औषधीगंधजे मूर्छा शिरोरुग्वमथुः क्षवः ७१ कामजे चित्तविभ्रंश
स्तंद्रालस्यावलक्षयः हृदये वेदना चास्य गात्रं च परिशुष्यति ७२ भयात्प्रलापः शो
काच्च भवेत्कोपाच्च वेपथुः अभिसाराभिघाताभ्यां मोहस्तृष्णा च जायते ७३ भूताभि
षंगादुद्वेगो हास्यरोदनकंपनं प्रलापो भयसंतापो पारुष्यं वचनं तथा ७४ अथ गंभिर
ज्वरः श्रमक्षयाभिघातेभ्यो देहिनां कुपितोनिलः पूरईत्वाखिलं देहज्वरमापादयेद्भृशं
७५ गंभीरस्तु ज्वरो ज्ञेयो ह्यंतर्दाहेन तृष्णया इत्यागंतुकज्वरचिकित्सा अथविषम

५१

ज्वरनिदाने द्वौ कालौ सततो न्येद्युः एककुप्य दहर्निशाम् मुक्त्वैकाहं तृतीयोथ द्व्यहं सत्यक्तच
तुर्थकः घटी पंचाशदन्येद्युरन्यहस्तु तृतीयकः द्व्यहं च तुर्थो व्याप्नोति त्रय एते विपर्ययाः
अग्निवेस्यपलेक विषमज्वरः दोषाल्पोहितसंभूतो ज्वरोत्सृष्टस्य वा पुनः धातुमन्यतमं प्रा
प्यकरोति विषमज्वरं ७६ यस्मादनियतात्कालाच्छीतोष्णाभ्यां तथैव च वेगतश्चापि विषमोस
ज्वरो विषमो मतः ७७ विषमज्वरः किं करोति पाकांक्षायामाह संततं रसरक्तस्थः संततं रक्त
धातुगः दोषः कुर्याज्ज्वरं पुंसां सोन्येद्युः पिशिताश्रितः ७८ मेदोगतस्तृतीयेह्नि अस्थि
मज्जागतः पुनः कुर्याच्चातुर्थिकं घोरं मंतकं रोगसंकरं ७९ तत्र संततस्य लक्षणं सप्ता
हं वा दशाहं वा द्वादशाहमथापि वा संतत्या यो विसर्गी स्यात्संततः स निगद्यते ८० संतत
स्तिपैनैः ३ स्यान्तेरं तर्येणऊ विसर्गः ऊपरित्यागः ननु अयं विषमः कथमिसाशंक्याह ज्वरकः विसर्गो
द्वादशाकत्वाद्दिवसोऽव्यक्तलक्षणः दुर्बलोपशमः काले दीर्घमप्यनुवर्तते ८१ ज्वराः पंच
च ये प्रोक्ताः पूर्वं संततकादयः चत्वारः संततं हित्वा ज्ञेयास्ते विषमज्वरा इति ८२ अथ

मध्याह्न
॥अहोरात्रयोषट्कालाः पूर्वाह्नि अपराह्न प्रदोष अर्द्धरात्र प्रत्यूष एतेषा षट्का नामध्ये सततकः द्वौकालौ

वै०वि संततादिलक्षणं अहोरात्रे सततको द्वौकालावनुवर्तते द्वौकालाविति अहन्येकंकालं रात्रावेकंकाले अनयोक्तं वाग्भट्टेन वयोहोरात्रिभुक्तानां समध्यादिकाक्रमादिति अथान्येद्युः लक्षणं ८३ अन्येद्युष्कस्त्वहोरात्रादेवकालं प्रवर्त्तते प्रायोदोषापेक्षया एककालमपि स्थिती यकालेयाति एवंदोषाणामपि स्थितिः स्वभावात् तृतीयचतुर्थयोलक्षणमाह तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ८४ तृतीयेऽह्नि इति आगमदिनं गृहीत्वा यतश्चोक्तं सुश्रुतेन दिनमेकं मतिक्रम्य यो भवेत्स तृतीयकः दिनद्वयमतिक्रम्य यस्यात्स हि चतुर्थकः ८५ अत्रचरकोप्याह कफस्थानविभागेन यथासंख्यं करोतिहि सततान्येद्युष्कत्र्याख्यश्चतुर्थकप्रलेपकान् ८६ अहोरात्राद होरात्रं स्थानात्स्थानं प्रपद्यते दोषोह्यामाशयं प्राप्य करोति विषमं ज्वरं ८७ कफस्थानमिति आमाशयः उरः कंठः शिरः संधयः पंच एषु तिष्ठन्दोषः यथासंख्यं संततादीन्करोति कालद्वये ह्यहोरात्रे व्यतीतहृदये गतः आमाशयं गत्वा ह्यन्येद्युष्कं करोति सः ८८ तत्रप्रकोपकालो द्वौ एकं

नुवर्तते

वेगंकरो

दोष

स्मिन् हृदयंगतः आमाशयं परेकालेगत्वा कंठे स्थितः पुनः ८९ एकस्मादहोरात्राद्
याति हृदयं हि सः दिने तृतीये चागस्य दोषो ह्यामाशयं पुनः ९० निजप्रकोपकाले हि कु
रोति वै तृतीयकं एवं शिरः स्थितो दोषः कंठमायाति चैकतः ९१ अहोरात्रा सुनस्त
स्मादायाति हृदयं दिने आमाशयं च तुर्थेन्हि प्राप्य कुर्याच्चातुर्थकं ९२ दिने तृतीये चा
तुर्थे ज्वरस्यागमनं कथं अत्रोक्तं चरकेण दोषः प्रकोपकाले हि वेगवत्त्वेन लाघवात्
वेगावसरहत्वायं स्वस्थानमधिगच्छति ९३ निवृत्तः पुनरायाति विषयो नियमे दिने
स्वभावे कारणं तत्र मन्यन्ते मुनिपुंगवाः ९४ अथ तृतीयं चतुर्थयोर्लक्षणं कफपित्ता
त्त्रिकग्राही पृष्ठं वातकफात्मकः वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ९५ च
तुर्थको दर्शयति प्रभावं द्विविधं ज्वरः जंघाभ्यां श्लैष्मिकः पूर्वं शिरस्तोऽनिलसंभवः
९६ प्रायशः सन्निपातेन पंचस्युर्विषमज्वराः विषमज्वर एवान्यश्चातुर्थिकविपर्ययः
९७

वै॰वि॰ अस्थिमज्जागतो दोषश्चातुर्थिकविपर्ययः तस्य लक्षणं समध्ये ज्वरयसन्हि आद्यं
तेन्चान्त्वि मुंचति ९८ इति विषमज्वरनिदानं अथ दाहशीतज्वरनिदानं समौ वातक
फौ यस्य क्षीणपित्तस्य देहिनः रात्रौ प्रायो ज्वरस्तस्य दिवा हीनकफस्य तु ९९ उभयो
र्भेदमाह त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरं तयोः प्रशांतयोः पित्तमन्ते दा
हं करोति ७० करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च तस्मिन्प्रशांते त्वितरौ कुरु
तः शीतमेव गः १ द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ दाहपूर्वस्तयोः
कष्टः सुखसाध्यतमोऽपरः २ इति समस्तविषमज्वरनिदानं इति सागीवैद्य
कृते वैद्यविनोदे ज्वरनिदानो ह्येकादशः परिच्छेदः अथ चिकित्सा ज्वरस्य पू
र्वरूपेषु वर्तमानेषु बुद्धिमान् पाययेत्तु घृतं स्वच्छं ततः सलभते सुखं १ विधि
र्मारुतजे श्रेष्ठं वं पैत्तिके च विरेचनं मृदु प्रच्छर्दनं तद्वत्कफजे च विरेचनं २ तत्र सुलं

६१

सोनपाउवळ० आरूलसा० कुरको० गुईनीब०

वै०वि० जयेत् १० अन्यः काश्मरीसारिवाद्राक्षात्रायमाणामृताभया कषायः सगुडः पीतोवा तज्वरविनाशनः ११ अथक्वाथप्रयोगकारमाह संछाद्यज्वलनंहोघोघोरंकुर्यादुपद्रवं नद्राक्वाथक्रियाभिश्चभिषक्कोष्टं समानयेत् १२ अपरं गुडूच्याः स्वरसोग्राह्यशतावर्या श्चतत्समः निहन्यात्सगुडः पीतः सद्योनिलकांज्वरं १३ अथपैत्तिके० कँदूलैंद्रयवाँपाँठा तिक्तामुस्ताश्टतंजलः पाचनंदशमेन्हिस्पात्तीव्रपत्तज्वरेनृणां १४ अथक्वाथः द्राक्षाहरी

बाहवा६ तकीमुस्ताकटुकीकृतमाल्लैको पर्पटश्चकृतः क्वाथः स्तीव्रपित्तज्वरापहः १५ तृणमूर्छा दाहपित्तासक्रूशमनोभेदनःपरः अन्यच्च पँटोलँबाँसकँत्तिक्ताकैरौतोधन्वयासकः त्रिंयंगुँश्चकृतः क्वाथोपेयः शर्करयायुतः १६ पिपासादाहपित्तास्त्रयुक्तंपितज्वरंजये त् अन्यः श्रीपर्णीचंदनोशीरपरूषकमधूकजः शर्करासहितः क्वाथोहंतिपैतक तंज्वरं १७ अन्यः गुडूचीपद्मलोध्राणांसारिवोत्पलयोस्तथा शर्करामधुरः क्वाथः

कायफ० पाहाड

६२

धितमाह सृष्टमारुतविण्मूत्रं क्लमक्षुत्पिपासासहं लघुं प्रसन्नात्मेंद्रियं क्षामं नरं विद्या
त्सुलंघितं ३ दारुहैमवतीकुष्टशताव्हाहिंगुसैंधवैः अम्लपिष्टैः सुखोष्णैश्च प्रव
नेवर्द्धमागते ४ उपवासश्रमकृते क्षीणे बालाधिके ज्वरे दीप्ताग्निं भोजयेत्प्राज्ञो नरं मां
सरसोदनं ५ मुद्गयूषोदनश्चापि हितः कफसमुत्थिते सएव सितया युक्तः शीतपि
त्तज्वरे हितः ६ मुद्गामलकयूषस्तु हितः पित्तकफात्मके दाडिमाम्लकमुद्गानां यूष
श्चानिलपैत्तिके ७ बालमूलकयूषस्तु हितोनिलकफात्मके निंबमूलकयूषस्तु पथ्यः
पित्तकफात्मके ८ दाहच्छर्दितं क्षामं निरन्नं तृष्णयार्दितं शीताक्षौद्रयुतं लाजैस्तर्पणं
पाययेज्वरे ९ अथवातज्वरे पाचनं गुडूचीपिप्पलीमूलं नागरं पाचनं स्मृतं अथक्वा सुंठी
थः शालिपर्णीबलाद्राक्षा गुडूचीसारिवा तथा आसां क्वाथं पिबेत्कोष्णं तीव्रवातज्वर

सा०नि१ चिकित्सा१

शीतः पित्तज्वरापहः १८ अथश्लेष्मज्वरचिकित्सा तत्रपाचनं बीजपूराशिफांकुहुत्रा
२ पिप्पलीमूलंनागरग्रंथिवैःसृतं सोक्षारंपाचनं श्लेष्मज्वरेद्वादशवासरे १९ क्वाथः भूनिंबनिंबपिप्प
ल्यः शुंठीशुंठिः शतावरी गुडूचीकृतिक्काथोयंहन्यात्कफकृतंज्वरं २० अन्यः पटोलं
त्रिफलातिक्ताशठीवासाउमृताभवेः क्वाथोमधुयुतःपीतोहन्यात्कफकृतंज्वरं २१ अ
थवातपित्तज्वरचि० तत्रक्वाथः पर्पटाब्दामृताविश्वाकिरातैःसाधितंजलं पंचभद्र
मितिख्यातंवातपित्तज्वरापहं २२ इतिपंचभद्रः अन्य० त्रैक्कोस्तिक्तामृताद्राक्षाशठी
चामलकीशिवा निःक्वाथ्यसगुडंक्वाथंवातपित्तज्वरेपिबेत् २३ अन्यच्च० मुद्गामल
कयूषश्चवातपित्तज्वरेहितः महादाहेप्रदातव्योयूषश्चणकसंभवः २४ अथवातश्ले
